एकाक्षर कोषाः

अनुक्रमणी

॥अमरकविविरचितः एकाक्षरी-कोषः॥

(धनञ्जयनाममालायामुपनिबद्ध)

विश्वाभिधानकोशानि प्रविलोक्य प्रभाष्यते। अमरेण कवीन्द्रेणैकाक्षरनाममालिका ॥१॥

अः कृष्णः **आः** स्वयंभूरिः काम **ई** श्रीरुरीश्वरः। **ऊ** रक्षणः **ॠ ॠ** ज्ञेयौ देवदानवमातरौ ॥२॥

लर्देवसू**र्ल्**वाराही भवेदेर्विष्णुरैः शिवः। **ओ**र्वेधा **औ**रनंतः स्या**दं** ब्रह्म पर**मः** शिवः ॥४॥

को ब्रह्मात्मप्रकाशार्के **कः** स्याद्वायुयमाग्निषु। **कं** शीर्षे सुसुखे **कु**स्तु भूमौ शब्दे च **किं** पुनः ॥५॥

स्यात्क्षेपनिन्दयोः प्रश्ने वितर्के च खमिन्द्रिये।स्वर्ग्गे व्योम्नि मुखे शून्ये सुखे संविदि **खो** रवौ ॥६॥

गस्तु गातरि गंधर्व्वे ज्ञायते गीतौ **गो** विनायके। स्वर्गे दिशि पशौ वज्रे भूमाविन्दौ जले गिरि ॥७॥

घस्तु सुघटीशे घा किंकिष्या च घुर्ध्वनौ। **ङं** मञ्जने ङो वृषभेजिने **चः** चन्द्रचोरयोः ॥८॥

चःसूर्ये कच्छपे **छं** तु निर्मले **ज**स्तु जेतरि। विजये तेजसि वाचि पिशाच्यां **जिः** जवेऽपि च॥९॥

झो नष्टे रवे वायौ **ञो** गायने घर्घरध्वनौ। **टं** पृथिव्यां करटे च **ठो** ध्वनौ **ठो** महेश्वरे॥१०॥

शून्ये बृहध्वनौ चंद्रमंङले **डं** शिवे ध्वनौ। **ढो** भये निर्गुणे शब्दे ढक्कायां **ण**स्तु निश्चये ॥११॥

ज्ञाने तस्तस्करे क्रोडपुंच्छयोस्ता पुनर्दया। **थो** भीत्राणे महीध्रे **दं** पत्न्यां **दा** दातुदानयोः ॥१२॥

बन्धे च **धा** गुह्ये केशे धातरि **धी**र्मतौ। **धू**र्भारकंपचिंतासु **नौ** नरे बन्धुबुद्धयोः ॥१३॥

निस्तु नेतरि **नुः** स्तुत्यां **नौः** सूर्ये **प**स्तु पातरि। पावने जलयाने च **फो** झंझाजलफेनयोः ॥१४॥

भाः कांतौ **भू**र्भुवस्स्थाने **भी**र्भये **मः** शिवे विधौ।चंद्रे शिरसि **मा** माने श्रीमात्रौवारणेऽव्ययम् ॥१५॥

मुः पुंसि बंधने यस्तु मातरिश्वनि **यं** यशः। यास्तु यातरि खट्वांगे याने लक्ष्म्यां च **रो** धृतौ ॥१६॥

तीव्रे वैश्वानरे कामे **राः** स्वर्णे जलदे ध्वनौ। **री** भ्रमे **रूः**भये सूर्ये लक्षण इंद्रे चलनेपि च ॥१७॥

लं तैले **लीः** पुनः श्लेषे **ली** भये **वो** महेश्वरे। **वः** पश्चिमदिशास्वामी **व** इवार्थे स्मरेऽप्ययम् ॥१८॥

शं शुभे **शा** तु शोभायाँ **शी** शयने **शु** निशाकरे। **शः** श्लिष्टे पुनर्गर्भे विमोक्षे **शः** परोक्षके ॥१९॥

सा लक्ष्म्यां **हो** निपाते च हुस्ते दारुणि शूलिनि। शं क्षेत्ररक्षसीत्युक्ता माला प्राक्सूरिसम्मता ॥२०॥

॥इति एकाक्षरीनाममाला समाप्ता॥

(एकाक्षरी-कोषः -अमरकविविरचितः-धनञ्जयनाममालायामुपनिबद्धः

अः २ - कृष्णः २

आः २ - स्वयंभूः २

इः २ - कामः २

ईः २ - श्रीः २

उः २ - ईश्वरः २

ऊः २ - रक्षणः २

ऋः २ - देवमाता २

ॠः २ - दानवमाता २

लः ३ - देवसूः ३

लृः ३ - वाराही ३

एः ३ - विष्णुः ३

ऐः ३ - शिवः ३

ओः ३ -वेधा ३

औः ३ - अनंतः ३

अं ३ - ब्रह्म परम् ३

अः ३ - शिवः ३

कः ४ -ब्रह्मा ४, आत्मप्रकाशः ४, अर्कः ४

कः ४ - वायुः ४, यमः ४, अग्निः ४

कं ४ -शीर्षे ४, सुसुखे ४

कुः ४ -भूमौ ४, शब्दे ४

किं ४ - पुनः ४,क्षेपः ५,निन्दा ५, प्रश्नः ५, वितर्कः ५

खम् ५ इन्द्रियं ५, स्वर्ग्गः ५, व्योम ५, मुखं ५, शून्यं ५, सुखं ५,संवित् ५

खः ५ - रविः ५

गः ६ - गाता ६,
गंधर्व्वः ६

गाः ६ - गीतं ६

गोः ६ - विनायकः ६,
स्वर्गः ६,दिक् ६, पशुः ६,
वज्रं ६, भूमिः ६, इन्दुः ६,
जलं ६, गिरि ६

घः ७ - सुघटीशे

घा ७ - किंकिणी ७

घुः ७ - ध्वनिः ७

ङं ७ -मञ्जनं ७

ङोः ७ -वृषभः ७, जिनः ७

चः ७ - चन्द्रः ७, चोरः ७

चः ८ -सूर्यः ८, कच्छपः ८

छं ८ - निर्मलं ८

जः ८ - जेता ८, विजयः
८, तेजः ८, वाक् ८,
पिशाची ८

जिः ८ - जवः ८

झः ९ - नष्टं ९, रविः ९,
वायुः ९

ञः ९ - गायनं ९,
घर्घरध्वनिः ९

टं ९ - पृथिवी ९, करटः ९

ठः ९ - ध्वनिः ९

ठोः ९ -महेश्वरः९, शून्यं१०,
बृहद्ध्वनिः १०,चंद्रमंडलं १०

डं १० - शिवः १०,
ध्वनिः १०

ढः १० - भयं १०, निर्गुणं
१०, शब्दः १०, ढक्का १०

णः १० - निश्चयः १०

तः ११ -ज्ञानं ११, तस्करः
११, क्रोडः ११, पुच्छः ११

ताः ११ - दया ११

थः ११ - भीत्राणं ११, महीध्रः
११

दं ११ - पत्नी ११

दा ११ -दाता ११, दानं ११

धा १२ -बन्धः १२, गुह्यं १२,
केशः १२, धाता १२

धीः १२ - मतिः १२

धूः १२ -भारः १२,
कंपः १२, चिंता १२

नः १२ - नरः १२, बन्धुः
१२, बुद्धः १२

निः १३ -नेता १३

नुः १३ - स्तुतिः १३

नौः १३ - सूर्यः १३

पः १३ -पाता१३,पावनं १३,
जलयानं १३

फः १३ - झंझा १३, जलं
१३,फेनः १३

भाः १४ - कांतिः १४

भूः १४ - भुवः १४,
स्थानं १४

भीः १४ - भयं १४

मः १४ -शिवः १४,विधिः
१४, चंद्रः १४, शिरः १४

मा १४ -मानं १४, श्रीमाता
१४,वारणं १४

मुः १५ - बंधनं १५

यः १५ - मातरिश्वा १५

यं १५ - यशः १५

याः १५ - याता १५,खट्वांगः १५,यानं १५, लक्ष्मी १५

रः १५ -धृतिः १५,तीव्रः १६, वैश्वानरः १६, कामः १६

राः १ - स्वर्णं १६, जलदः १६,ध्वनिः १६

रीः १६ - भ्रमः १६

रूः १६ - भयं १६, सूर्यः १६

लः १६ - इंद्रः १६, चलनं १६

लं १७ -तैलं १७

लीः १७ - श्लेषः १७

लीः १७ - भयं १७

वः १७ - महेश्वरः १७, पश्चिमदिशास्वामी १७

व १७ - इवार्थः १७, स्मरः १७

शं १८ -शुभं १८

शा १८ - शोभा १८

शी १८ -शयनं १८

शु १८ - निशाकरः १८

शः १८ - श्लिष्टः १८,गर्भः १८, विमोक्षं १८,परोक्षकं १८

सा १९ - लक्ष्मी १९

ह १९ -(निपातः) १९

हुः १९ - दारु १९, शूली १९

क्षं १९ - क्षेत्रं १९, रक्षसी १९

॥पुरुषोत्तमदेव प्रणीत एकाक्षरकोषः॥

अकारो वासुदेवः स्या**दाकार**श्च पितामहः। पूजायां अपि माङ्गल्ये आकारः परिकीर्त्तितः॥१॥

इकारो उच्यते कामो लक्ष्मी**रीकार** उच्यते। **उकारः** शङ्करः प्रोक्त **ऊकार**श्चापि रक्षणे॥२॥

ऋकारो देवमाता स्या**दॄकारो** दनुजप्रसूः। **ऌकारो** देवयोनिः स्या**लॄ**र्माता सद्भिरुच्यते॥३॥

एकारः कथितो विष्णु**रैकार**श्च महेश्वरः। **ओकार**स्तु भवेद्ब्रह्मा **औकारो** रुद्र उच्यते॥४॥

अं स्याच्च परमं ब्रह्म **अः** स्याद्देवो महेश्वरः। **कः** प्रजापतिरुद्दिष्टो **को** वायुरिति शब्दितः॥५॥

कश्चात्मा च समाख्यातः **कः** प्रकाश उदाहृतः। **कं** शिरो जलमाख्यातं **कं** सुखं च प्रकीर्तितं॥

पृथिव्यां **कुः** समाख्याता कुत्सायां **कुः** प्रकीर्तितः।**खं** इन्द्रियं समाख्यातं **खं** आकाशं उदाहृतं॥

खं स्वर्गे च समाख्यातं **खं** सर्पे च प्रकीर्तितं। तथा श्वभ्रे च **खं** प्राहुः **खं** शून्ये च प्रकीर्त्तितं॥

गो गणपतिरुद्दिष्टो **गो** गन्धर्वः प्रकीर्त्तितः। **गं** गीतं **गा** च गाथा स्याद्गौर्धेनु**र्गौः** सरस्वती॥९॥

गौर्मातापि समुद्दिष्टा पृथिव्यां **गौः** प्रकीर्त्तिता। **घो** घण्टायां समाख्यातः किङ्किणी **घा** प्रकीर्त्तिता॥

उपमा **घा** समाख्याता कुस्वरे **घुः** प्रकीर्त्तितः। हनने **घा** समाख्याता गन्धने **घः** प्रकीर्त्तितः॥११

ङकारो भैरवः ख्यातो **ङ**कारो विषये स्मृतः। **च**कारश्चन्द्रमाः ख्यातस्तस्करश्च प्रकीर्त्तितः॥१२॥

निर्मलं **छं** समाख्यातं तरणी **छः** प्रकीर्त्तितः। छेदने **छः** समाख्यातो विद्वद्भिः शब्दकोविदैः॥१३॥

वेगिते **जः** समाख्यातो जघने **जः** प्रकीर्त्तितः। जेता च **जः** समाख्यातः प्रसिद्धैः शब्दकोविदैः॥

झंझावाते **झकारः** स्यान्नष्टे **झः** समुदाहृतः। **ञ**कारो गायने प्रोक्तो **ञ**कारो घर्घरध्वनौ॥१५॥

टङ्कारे **टः** पृथिव्यां **टा** टो ध्वनौ च प्रकीर्तितः। **ठो** महेश्वर आख्यातः शून्ये च **ठः** प्रकीर्तितः॥

बृहद्ध्वनौ च **ठः** प्रोक्तस्तथा चन्द्रस्य मण्डले। **डकारः** शङ्करः प्रोक्तस्त्रासध्वन्योः प्रकीर्तितः॥१७॥

ढकारः कीर्तिता ढक्का निर्गुणे च ध्वनावपि। **णकारः** कीर्तितो ज्ञाने निर्णयेऽपि प्रकीर्तितः॥१८॥

तकारः कथितश्चौरः क्रोडे पुच्छे प्रकीर्तितः। शिलोच्चये **थकारः** स्यात्थकारो भयरक्षणे॥१९॥

दं कलत्रे समाख्यातं **दो** दानच्छेदधातुषु। **धं** धने च धनेशे **धो धा** धातरि निदर्शितः॥२०॥

धिषणा **धीः** समाख्याता **धूश्च** स्याद्भारचिन्तयोः। **नकारः** सुगते बन्धे **नुः** स्तुतौ च प्रकीर्तितः॥

नेता **नीश्च** समाख्यातस्तरणौ **नौः** प्रकीर्तिता। **नकारः** सौगते बुद्धौ स्तुतो सूर्ये च कीर्तितः॥

नशब्दः स्वागते बन्धौ वृक्षे सूर्ये च कीर्तितः। **पः** कुबेरः समाख्यातः पश्चिमे च प्रकीर्तितः॥२३॥

पवने **पः** समाख्यातः **पाः** पाने **पाश्च** पातरि। कफे वाते **फकारः** स्यात्तथाह्वाने प्रकीर्तितः॥२४॥

झंझावाते **फकारः** स्यादक्षरे च प्रकीर्तितः। कोपे **फिश्च** समाख्यातस्तथा निष्फलभाषणे॥२५॥

वक्षःस्थले च **बः** प्रोक्तो गदायां समुदाहृतः। नक्षत्रं **भं** बुधैः प्रोक्तं भ्रमरे **भः** प्रकीर्तितः॥२६॥

भा दीप्तिरपि **भूर्भू**मि**र्भी**र्भयं कथिता बुधैः। **मः** शिवश्चन्द्रमा वेधा **मा** च लक्ष्मीः प्रकीर्तिता॥२७॥

॥सौभरीकृता एकार्थनाममाला॥

प्रणम्य सुधियां नाथं देवदेवं रमापतिम्। एकार्थनाममालां तु कुर्वे चेतःप्रसादिनीम्॥१॥

अः कृष्णः शंकरो ब्रह्मा शक्रः सोमोऽनिलोऽनलः। सूर्यः प्राणो यमः कालो वसन्तः प्रणवः सुखी॥२॥

आः स्वयंभूरिभो वाजी खेदः शंकरवासवौ। पारिजातः समः प्राज्ञो निवासश्चणकः सुतः॥३॥

इः काम स्थाणुरिन्द्रोऽर्को वरुणः पादपो द्विपः। शुचिः श्रीमानजो बालो विरिञ्चिः कृत्तिकासुतः॥४॥

ईरीश्वरो भवेच्छत्रुः पुरुषः करुणोऽरुणः। अप्रजाः सुप्रजाः शङ्कुर्मुकुरो नकुलोऽकुलः॥५॥

उगौरीपतिरुःकालः सेतुर्नाथः परायणः। नारदोऽर्कोऽनिलः पाशी मार्कण्डेयोऽथ रावणः॥६॥

ऊः परेतोऽण्डजस्त्वष्टा विवस्वानग्निसारथिः। वह्निर्निशाकरः पूर्णो दरिद्री सरमाधिपः॥७॥

ऋःर्निऋतिर्नलो नाकः खगराडथ वासुकिः॥ शालः पितृस्वसुः पुत्रोऽदितिर्दितिरुमा रमा ॥८॥

ॠर्निषेधो भवः पूषा वरुणोऽमरराडजः। करी तरुर्नरः पाप्मा विद्वानथ रमापतिः॥९॥

लृर्म्लेच्छोऽरुणवर्णः स्यात्क्लीबः पापी पराजितः। वीतरागोऽथ पाखण्डी कमलं मरणं च लृ ॥१०॥

लॄर्महात्मा सुरो बालो भूपः स्तोमः कथानकः। मूर्खः शिश्नो गुदः कक्षा केशः पापरतो नरः॥११॥

एः कुमारोऽसुरोऽरातिर्ज्ञातीयोऽहित उद्धतः। आत्मा शेषो विवस्वांश्च कृतार्थो मध्वरिः शरः॥१२॥

ऐः क्रूरो धरणीनाथः पूरो मारोऽमरोऽसुरः। कुलालो राधरः प्राज्ञो मन्दः पुत्रोऽथवा नरः॥१३॥

ओर्वेधा ज्ञो ध्रुवोऽगस्त्यो गरुडोऽगोऽक्षयोऽसुरः। आखुः काणोऽथ मार्जारः साधुः सङ्गः पराशरः॥

औः श्वा युवा नरो नारी भावः सूक्ष्मः प्रजापतिः। स्थूलो जारः कलावांश्च सुखी दुर्गा रतिः कविः॥

अं सुखं कश्मलं दुःखं पूर्णं दूरं गतं वरम्। अः प्रागुक्तो जिनाघेषु विष्णुभृत्येन यः स्तृतः॥१६॥

को ब्रह्मा **का** मही दुर्गा **किः** सुग्रीवो रमापतिः। आखण्डलोऽथ सूर्योऽग्निर्व्याधः कर्षक इत्यपि ॥१७॥

कीर्गजस्तुरगो व्यालो जारो जीवः पिपीलिका। धरा रमा च द्विट् रुट् च पुरुषः पाटलश्च गौः ॥१८॥

कुः पृथ्वी कुः कुचः कूलं **कूः** कृत्या भूरपि स्मृता। **केः** प्राणोऽर्को मदः सारः क्लीबः **कैः** प्रणतः शुचिः ॥१९॥

को कुर्कुरो जनः श्यावः श्यानः शोकश्च **कौ**र्वृषः। **कं** शिरः कं सुखं तोयं पयो दुःखं विषं भयम्॥२०॥

कः प्रागुक्तोऽथ **खः** सूर्यः **खा** मा क्ष्मा कमला च गीः। **खिः** कामः **खी**र्गुदो धाता **खु**र्वह्निः **खू**र्बृहस्पतिः ॥२१॥

खेः प्राणः **खै**र्भवो भ्राता पुत्रः **खोः** खञ्च उच्यते। **खौः** सुरेशोऽग्निरीशोऽर्कः **खं** व्योम च खमिन्द्रियम्॥२२॥

खः प्रागुक्तोऽथ **गः** प्रीतो भवः श्रीपतिरुत्तमः। **गा** क्ष्मोमा च रमा **गि**र्धी**र्गीः** श्रीमानथ बुद्धिमान्॥२३॥

गीर्वाणी गीस्सुरा पत्नी सुधा **गुः** प्राण आसवः। गुः कान्तिर्मदनो भीरु**र्गूश्च** सेतुः सखा रविः॥२४॥

गुरुः पुरीषं **गूः** श्वादो **गेः** पापी जनवञ्चकः। **गैः** पलाशोऽपशोकोऽग्निस्सूर्यो **गो**र्द्विपदः करी॥२५॥

गोर्वज्रं **गौः** प्रभा भूमिर्वाणी तोयं त्रिविष्टपम्। धेनुर्बस्तो वृषो दिग्गौर्नेत्रं लज्जा गुरू रमा॥२६॥

इन्द्रियं श्रीरुमा **गं** च वादित्रं शरणं वरम्। गः प्रागुक्तोऽथ **घः** सूनुर्वह्निः पूषा नृपो गजः॥२७॥

घा रमा च शची दुर्गा भूमि**र्घि**र्धृतधर्मकः। **घीः** कुमारोऽमराचार्यो **घु**र्मूढोऽकरुणः फणी॥२८॥

घूर्भूमि**र्घू**स्सुराधीशो गुदः संकर्षणोऽमलः। **घे**श्शङ्खः कुर्कुरः कीलो **घैः** सूर्यः सरमासुतः॥२९॥

घोर्घोषो **घौ**स्सुरावासः पाप्मा **घं** पापमुच्यते। घः प्रागुक्तोऽथ **ङः** प्राणस्तुरगो **ङा** धरा रमा॥३०॥

ङिर्बीभत्सुर्नृगः** सूक्ष्मो **ङी**र्भूपः कृकलासपः। **ङुः** सूकरोऽथ **ङू**र्व्याघ्रो **ङेः** सूतो **ङैः** पराशरः ॥३१॥

**मृगः??

ङोश्च सिंहोऽथ **ङौः** सूर्योऽरुणो वह्निः** कलानिधिः। **ङं** वितानं सुखं ब्रह्म सर्पिस्तोयं विषं पयः ॥३२॥

** वह्निः??

ङः प्रागुक्तोऽथ **चश्च** चुश्चरणोऽर्चिर्मुखो रविः। **चा** कद्रूरदितिः कन्या **चिः** पूषा माष एव च॥३३॥

ची मषिर्दन्तिपत्नी स्याच्**चुः** कालोऽथ पविः शरः। भीरु**श्चू**र्मार्गणोऽपि स्यात्पक्षी भूमिजराड्रविः॥३५॥

चेः कृष्णोऽर्कस्तुराषाट् च **चैः** सोमो विनतासुतः। **चोः** पाखण्डि च **चौ**र्धेनुरनड्वानग्निरुद्धतः॥३५॥

चं चरित्रं सुखं दुःखं कश्मलं भ्रमणं पयः। चः प्रागुक्तोऽथ **छः** सोमः **छा** च रुट् छिः कुलालकः॥३६॥

छी छवि**श्छु**श्शुक**श्छू**र्भू**श्छेः** पाशी **छैः** सुरालयः। **छोः** पूर्णोऽलंकृतो वायु**श्छौः** समीरस्तरुर्नगः॥३७॥

छमर्चिर्भूतलं स्व स्यात्कूटं कूलं मुखं कुलम्। छः प्रागुक्तोऽथ **जो** जारो **जा** योनिर्जिः सदाशिवः॥३८॥

जीर्जिष्णुः करुणो यूका **जु**र्विष्णु**र्जूः** कुलालजः। **जेः** शुनीजोऽथ **जैः** पूषा वह्नि**र्जोः** कमलासनः ॥३९॥

जौर्जारोऽजो युवा **जं** च जातं रजतमेव च। जः प्रागुक्तोऽथ **झो** हस्तो **झा** योनिर्झिः कला कपिः ॥४०॥

झीः करी **झु**र्भृगु**र्झूश्च** ध्रुवः संघोऽमरोऽरुणः। **झे**श्धर्मकृद्भवः सोमो रोमा रामोऽथ **झै**र्गुरुः॥४१॥

झोः कर्णो **झौ**स्स्मृतो नाको **झं** मैथुनमिति स्मृतम्।झः प्रागुक्तोऽथ **ञश्चा**ग्नि**र्ञा** जरा राशिरेव च॥

ञिः सम्राड् ज्ञानवृद्धोऽग्नि**र्ञीः** पाखण्डि सुराप्रियः। **ञुः** सुनेत्रा **ञूः** सुवासा **ञेः** कार्तस्वरसंनिभः ॥४३॥

ञैः कृष्णा **ञोः** पलाशः स्याद् **ञौ**र्गौः पाखण्डवाक्करी। पूर्वा ध्रुवा च **ञं** सर्पिः परं ब्रह्म निगद्यते॥४४॥

ञः प्रागुक्तोऽथ **टः** प्लीहो मूत्रकृच्छ्रोऽथ पिप्पलः। **टा**सूया **टिः** करेणुर्भूः सरमा **टी**र्धराधरः॥४५॥

टुः कङ्कणोऽथ चूडः स्या**ट्टू**र्ननन्दा स्वसा च भीः। **टेः** काण**ष्टै**र्द्विडन्धः स्या**ट्टैः** प्रोतो नभसी हयः॥

टोः परेतो गुरुः शिष्यः **टौ**र्विनीतो देवो वृषः। **टं** नेत्रं श्रवणं पात्रं भ्रमणं मरणं तथा॥४७॥

टः प्रागुक्तोऽथ **ठः** सुनुर्ज्ञानी मध्वरीरेव च। वाचालः शून्य आसारः **ठा** शून्या नासिकेत्यपि॥४८॥

ठिः कुमारोऽमरारातिः**ष्ठीः** कुटुम्ब्यथ पुत्रवान्। **ठुः** कदम्बो यमस्त्वष्टा **ठूः** प्रज्ञा धृतिरेव च॥४९॥

ठेः समासोऽपि **ठैर्व्यासः** **ठोः** समष्ठौश्च गौतमः। **ठं** ज्ञानं विवरं शून्यममृतं शारदं पयः॥५०॥

ठः प्रागुक्तोऽथ **डः** साथो** **डा** क्ष्मा च सरमा रमा। **डिर्गौरी** **डी** शिवा धात्री **डुश्चन्द्रो** **डूः** कलापवान्॥

**सार्थो??

डेर्धर्मो **डैर्वृषः** कर्णो **डोः** पापी पुरुषाधमः। **डौर्धनुश्च** करो जारो **डं** नेत्रं च पयस्तथा॥५२॥

डः प्रागुक्तोऽथ **ढः** श्वादः श्वा मार्जारस्तथा खरः। **ढा** नाभिर्ढिर्गुदो मेढ्रो वह्निरुत्कटः**॥५३॥

**छन्दो भङ्गः अत्र प्रायः ढीर्वह्निरुत्कटः इति स्यात्

ढुः कर्मः सूकरो व्यालो **ढूः** कुचो **ढेः**कुरङ्गगजः। **ढैर्मारो** **ढोः** सुखी वर्यो **ढौर्भूमिर्ढं** पयो वरम्॥५४॥

ढः प्रागुक्तोऽथ **णो** नक्रो **णा** नाभिर्णिवृकोऽजरः। **णीः** स्वर्गो **णुः** करेणुर्भूर्**णूः** कालिन्दी सटा जरा॥

णेर्मार्जारो विडङ्गश्च **णैः** शृगाली हरीतकी। **णोः** सर्षपोऽथ **णौर्माया** **णं** दर्शनमिति स्मृतम्॥५६॥

तः सुवेषोऽथ **ता** नारी **तिर्मूषक** उमेश्वरः। **तीर्नदी** जलधिः प्रोक्त**स्तुः** सारङ्गो रमेश्वरः॥५७॥

तूर्म्लेच्छस्**तेः** करी नक्र**स्तैः** कलापी दितिः प्रसूः।**तोः** सूर्ये विघ्नकृत्स्वामी **तौः** स्वर्गो भूस्तथा गरः॥

आचार्यो यजमानश्च **तं** तृणं जलमेव च। तः प्रागुक्तोऽथ **थः** सूर्यो गणेशो विनतासुतः॥५९॥

था धरित्री प्रभा गङ्गा **थिर्गोदा** यमुना तथा। **थीः** समुद्रो व्रणो रेवा **थुः** साक्षी **थूः** पराशरः॥६०॥

थेर्व्यासस्थैः शुकः प्रोक्तः **थोर्धर्मो** गाधिपुत्रकः। **थौः** शङ्खस्थं विषं कर्म बहुलं सूक्ष्ममेव वा॥६१॥

थः प्रागुक्तोऽथ **दो** दाता **दा** दात्री धरणी शुभा। **दिर्दानी** **दीस्सुधानाथो** **दुर्दरिद्री** करोऽवरः॥६२॥

दुर्दुःखी **देः** स्मृता जाया **दैर्मत्स्यो** वामनर्षभः। **दोर्हस्तश्चरणः** शिश्नो **दौः** स्वर्गः प्राण आत्मजः॥६३॥

दं दानं शरणं कर्म भव्यं न्यूनमकिल्बिषम्। दः प्रागुक्तोऽथ **धो** धाता विष्णुर्वा गिरिजात्मजः॥६४॥

धा धरित्री रमा गौरी **धिर्**धर्मो **धीर्**वृकासुरः। **धुस्**तनुर्धूः करो भारो **धेर्**वृषो **धैश्**च रावणः॥६५॥

धोः पापी वृषणः पूषा **धौर्**धर्मः पृथिवी गिरा। **धं** धनं धूननं दानं धारणं करणं सुखम्॥६६॥

धः प्रागुक्तोऽथ **नो**ऽभावो **ना**स्तीति पुमान्गरिमा तथा। **निर्**दुर्गतिश्च **नी** रागो **नुर्**देहो **नूः** कलत्रवान्॥

नेः समो **नैः** कुरङ्गोऽग्नि**र्नौ**स्तरिः पुरुषोऽमरः। **नं** नेत्रमञ्जनं श्रोत्रं करणं कारणं सुखम्॥६८॥

नः प्रागुक्तोऽथ **पः** पापी पूषा आत्मजः। **पा**पर्णा **पिः** पवित्रोऽग्निः **पी** स्मृताऽथ पिपीलिका॥६९॥

पुः पुत्रः **पूः** पुरं देहः **पेः** पेशी **पैश्**च गालवः। **पोः** पौत्रः **पौः** पुमान्भूमिः **पं** प्रीणनमृणं पयः॥७०॥

पः प्रागुक्तोऽथ **फो** माघः **फा** फूत्कारवती विषा। **फुः** कार्तिकोऽथ **फूः** सर्पो वासवः शरणागतः॥७१॥

फेः फाल्गुनोऽथ **फैः** शङ्खः **फोः** कालः **फौः** फणीश्वरः। गर्गो द्रोणो रणो बाणः **फं** फल्गु चारु च स्मृतम्॥

फः प्रागुक्तोऽथ **बो** बिम्बो **बा** स्मृता नर्मदासरित्। **बिः** पूपो **बीर्**बटुः पादो **बेः** साक्षी **बैः** कणो रणः॥

बोः प्राणो **बौः** सरिद्गङ्गा **बं** बलं बहुलं स्मृतम्। बः प्रागुक्तोऽथ **भः** सोमो **भा** कान्तिर्मदिरेन्दिरा॥

भिः पत्नी **भीश्**च भीतिः स्या**द्भु**र्भुजङ्गोऽथ **भूर्**मही। जाता जातश्च **भेः** कान्ति**र्भौ**र्ब्रह्मा वरुणो यमः॥७५॥

भैः प्रहारोऽथ भीरुः स्या**द्भोः** कंसो **भौ** रमापतिः। **भं** नक्षत्रं भयं ब्रह्म भरणं धरणं पयः॥७६॥

भः प्रागुक्तोऽथ **मः** स्तोमः सोमो रामो रणो गजः।**मा** जालन्ध्री व्यथा लक्ष्मीर्माता **माः** मास ईरितः॥

मिः कर्णो **मीर्**महाबाहु**र्मु**र्माता **मूर्**महाबलः। **मेः** सारङ्गोऽथ **मैः** पूषा सारथिः प्रणतो वरः॥७८॥

मोः पत्नी **मौः** सुरावासो **मं** गलं मलिनं फलं। मः प्रागुक्तोऽथ **यः** पुञ्जः सुदेवीसूनुरीश्वरः॥७९॥

या योनि**र्यि**श्च सङ्ग्रामो **यीर्**गजः सारथिर्द्रुमः। **युः** सर्पे **यूः** स्मृता यूका **येः** सार्थो **यैश्**च वासवः॥८०॥

योः पादो **यौः** कणः स्वर्गो **यं** यत्नं करुणं मधु। यः प्रागुक्तोऽथ **रः** कामो वह्निः सूर्योऽथ तोयधिः॥

रा लक्ष्मी **राः** समृद्धिः स्या**द्रिः** कर्पूरो महेश्वरः। **रीः** कामो मृगपत्यग्नी **रू**र्मृगो **रूः** प्रजापतिः॥८२॥

रेः खेदो वापि संबुद्धी **रैः** कृष्णो वर्ण उच्यते। **रो** रोषो **रौ**र्भवः स्वर्गो **रं** रत्नं रोदनं धनम्॥८३॥

रः प्रागुक्तोऽथ **ल**श्चरो लक्ष्मणो ललना च **ला**। **लिः** सर्पो **ली** धरा **लु**र्भू**र्लू** रुद्रो गरुडोऽरुणः॥८४॥

लेर्लवो **लैः** कुशो रामी **लो**र्मत्स्यो **लौः** प्रजापतिः। **लं** लक्ष्मणं सुखं नाम रक्षः श्रोत्रं वचो विषम्॥

लः प्रागुक्तोऽथ **वः** पङ्गुः सुखी **वा** त्रिदशप्रसूः। **विः** पक्षी गरुडः सूर्यो जलधिः सोम उच्यते॥८६॥

वीर्विष्णुर्वुः पदातिः स्या**द्वूः** सङ्घो गज उच्यते। **वेः** पारिजातो **वैः** सारो **वोः** कालो **वौः** सुखावहः॥

वं सुखं वसनं रक्तं वपुर्वचनमासुरम्। वः प्रागुक्तोऽथ **शः** शम्भुः **शा** गौरी कमलालया ॥८८॥

शिः पक्षी श्यथ सौभाग्यः शिशुः **शुः** शार्क्करोऽचलः। **शूः** रुद्रः **शेः** शिरीषोऽगः **शैः** स्मृतो धन्धुहा नृपः॥८९॥

शोर्दोषः **शौः** शिशुः शाङ्खः **शं** सुखं शरणं वपुः। शः प्रागुक्तोऽथ **ष** षञ्जो वह्निः सूर्यो रणः कणः॥

पारिखा **षा** खरी शावा **षिः** शङ्खो वर्तुलः स्मृतः। **षीः** पुत्रः **षुः** खुरः पूरः **षूः** सोमो म्लेच्छ एव च॥

षेः सार्थः **षैः** खरः पारः **षो**र्देहो मलिनो जनः। **षौः** खट्वा धरणी बुद्धिः **षं** सस्यं मधु धारणम्॥९२॥

षः प्रागुक्तोऽथ **सः** सूर्यः **सा** सीता **सिः** सखामरः। **सीः** सुखी **सुः** कुठारोऽर्कः **सू**र्धरा गर्भिणी नरी॥

सेः सारः **सैः** शुकः श्वादः **सोः** सोमः **सौः** सहोदरः। **सं** सुखं शरणं कार्यं प्रधानं सरणं वरम्॥९४॥

सः प्रागुक्तोऽथ **हो** हर्षो हिरण्याक्षोऽथ तस्करः। **हा** गन्धर्वोऽथ **हिः** सर्पो **ही**र्नरो हर्षवान्मृगः॥९५॥

हुस्स्मृतो नहुषो राजा **हू**र्विप्रो **हेः** प्रसादकृत्। **है**र्हासो **हो**श्वसंबुद्धि**र्हौ**र्विरिञ्चिः षडाननः॥९६॥

हं चौर्यं हरणं पूर्णं भासुरं भरणं भरम्। हः प्रागुक्तः स्मृतं लक्षणमुक्तं तु परं ब्रह्म सनातनम्॥९७॥

क्षः क्षान्तिः **क्षा** मही सीता **क्षि**र्ज्योतिः **क्षी**र्हुताशनः। **क्षुः** क्षुद्रो वासवो वार्कः **क्षूः** पापिष्ठः प्रणाशनः॥

क्षे कर्षकोऽथ **क्षै**र्मूर्खो जारः **क्षोः** क्षुरको व्रणः। **क्षौः** खञ्जो धरणीधर्ता **क्षं** क्षेत्रं पयो मधु॥९९॥

क्षः प्रागुक्त इयं माला शब्दी सौभरिणा कृता सा श्रुताङ्गिरसा चास्तु विद्वच्चेतः प्रसादिनी ॥१००॥

॥इति श्रीसौभरीकृता मातृकानाममाला संपूर्णा॥

॥नानार्थरत्नमालायां भास्करकविकृतायाम् एकाक्षरकाण्डः॥

॥श्रीरामाय नमः॥

देवानामपि मूर्धानो यन्निर्धारणभीरवः। तदपास्ततमस्तोमं वस्तु वन्दामहे वयम्॥१॥

यत्पादाम्बुरुहच्छायादेवचूडामणायते। यस्य ज्ञानादयोनन्ताः सदेवः श्रेयसेस्तु नः॥२॥

ग्रथ्नामि रम्यनानार्थरत्नमालां गुणोज्ज्वलाम्। भास्करः कृतिनां मान्यो नात्यल्पां नातिविस्तराम्॥

काण्डैश्चतुर्भिरेकद्वित्रिचतुर्वर्णवर्णितैः। संकीर्णाव्ययकाण्डाभ्यामिति षड्भिरनुक्रमात्॥४॥

कथ्यन्ते केपि नानार्थाः शब्दास्तत्रान्तराध्वना। अमी सलिङ्गनिर्लिङ्गभेदात् द्वेधा भवन्ति हि॥५॥

सलिङ्गा सप्तधा वृत्त्या स्त्रियां पुंसि नपुंसके। स्त्रीपुंसयोः क्लीबपुंसोः स्त्रीनपुंसकयोस्त्रिषु॥६॥

शब्दान् पुंसः स्त्रियः क्लीबान् नानालिङ्गान् त्रिलङ्गकान्।प्रायःक्रमात्प्रवक्ष्यामि कान्तादिष्वक्षरादिषु॥

रूपभेदात्साहचर्यात्कण्ठोक्त्या चापि भावयेत्। लिङ्गं ह्यथादित्वं तं वापदं पूर्वेण नान्वयि॥८॥

त्रिष्विति त्रिषु लिङ्गेषु ज्ञेयं द्वन्द्वे द्वयोरिति। लिङ्गान्तरनिषेधो वा शेषलिङ्गविधायकः॥९॥

अकारो ब्रह्मविष्ण्वीशकमठेष्वङ्गणे गणे। गरलेन्तःपुरे हेतौ भूषणेत्वम्बुजेव्ययम्॥१०॥

आकारस्तु घटे भावे परिलापेपि तामहे। **इकारः** फणिरत्नार्चिष्यग्रतार्थग्रहार्थयोः॥११॥

हरेकरेणुकक्ष्यान्ते निशाकरकरे स्मरे। **ईकारो**ब्जदले लक्ष्म्यां वाण्यां कमलकेसरे॥१२॥

रसनायां शक्रचापे बाणे फणिनि कन्दरे। **उकारः** क्षत्रिये नेत्रे हरमौलौ हरे हरौ॥१३॥

तापसे व्रतचर्यायां मेघे च सरिदन्तके। **ऊकारः** पुरुषे चन्द्रे राजपुरुत्रे गले सुरे॥१४॥

प्राणोपमयोः पूर्णकुम्भे वणिजि रक्षके। **ऋकारः** कुञ्जरे शैले धीभेदे देवमातरि॥१५॥

भावे देवरिपौ नद्यां सुरायां विवरे दिवि। **ॠकार**श्चिकुरे सर्पे दृष्ट्यां विगतसंपदि॥१६॥

हेमपद्मादितिस्वर्गधनभूषाम्बुजन्मसु। **लृकारो** दन्तिनां दन्ते कुलीरकपिदन्तयोः॥१७॥

स्वर्गादित्योर्लिप्तगात्रे गतनम्नरि रक्षसि। **लॄकारः** कृकलासे द्वोरङ्गेपि मकरे सुरे॥१८॥

लीलागतौ लोचने स्त्रीनागमातरि मातरि। **एकार**स्तेजसि रात्रौ हर्म्ये हरौ हरे॥१९॥

व्योम्न्येकादशसंख्यायां दिनादौ मणिकुट्टिमे। **ऐकारो** दिङ्मुखे हस्ते हरेद्रिशिखरे त्वचि॥२०॥

ओकारः पद्मकुड्याम्बुश्रीदमेघेन्दुयोनिषु। शक्रे जवे विरिञ्चे स्या**दौकार**स्त्वम्बिकासुते॥२१॥

विशुद्धाङ्गेन्दुकलयोरनन्ते सिद्धपुष्पके। **अंशब्दो** वक्रवाक्येतिदीर्घेञ्जलिनियोगयोः॥२२॥

सप्तस्वरान्तिमाने च परंज्योतिषि च स्मृतः। **अः** शिखायां सिद्धमन्त्रे प्रग्रहे करथार्वणि॥२३॥

चक्रे कुक्कुटमूर्ध्नीन्दुबिम्बे ब्रह्मेशविष्णुषु॥छ ॥**को** ब्रह्माब्जानिलार्काग्निचित्तधीयमकेकिषु॥२४॥

विष्णावाहृतशब्देब्धौ सितवर्णे वसौ सुते। **कं** शिरोम्बुसुखे क्लीबे तत्रैकवचनाव्ययम्॥२५॥

किं प्रश्नाक्षेपकुत्सासु विचित्रे च त्रिलिङ्गकः। **कि**मव्ययं च कुत्सायां विकल्पप्रश्नयोरपि॥२६॥

कुः स्त्री भुवि कु पापेल्पे कुत्सायां वरणेव्ययम्। **खः** पुमान् गरुडे घ़गे स्वर्गे शान्तरसे मणौ॥२७॥

खमिन्द्रिये सुखे व्योम्नि नक्षत्रेपि च पट्टने। कृपाफलकयोः शून्ये बिन्दौ वेदेशरन्ध्रयोः॥२८॥

गं गीते गा च गाथायां गो गायकभगीरथौ। **गौ**र्नाके वृषभे चन्द्रे वाग्भूदिग्धेनुषु स्त्रियाम्॥२९॥

द्वयोस्तु रश्मिदृग्बाणस्वर्गवज्राम्बुलोमसु। मेघे निदाघे किंकिण्यां घण्टायां घटने च **घः**॥३०॥

घं बाधामृतयोर्धातु वार्ता घोरेषु घस्त्रिषु। **ङं** क्लीबे मण्डने ङा तु भैरवे विषये जने॥३१॥

चस्तु तक्के स्वरे चापे चकोरे चन्द्रमस्यपि। **चा** स्त्री शोभाशोणिते तु **चं** क्लीबे विमले त्रिषु॥३२॥

छले त्वाच्छादनाब्जेषु **छं** क्लीबं संमतौ पुमान्। त्रिष्वयं निर्मले नित्ये मलिने भेदकेपि च॥३३॥

जो जवे विजये मेरौ शब्दे जेतरि मत्सरे। **जा** स्त्रियां देववाह्निन्यां योनिसागरवेलयोः॥३४॥

जा भूमिमौर्व्योः कुल्यायां रसायाः पृष्ठभागके। **जं** कटीभूषणे पत्न्यां तेजस्यम्बुनि जन्मनि॥३५॥

जः कीर्त्यां सगरे जुर्ना जीवे व्योमपिशाचयोः। **जू** स्त्री वाण्यां झशब्दस्तु शब्दे धातरि हिंसके॥३६॥

प्रतापे भ्रमरे नष्टे चोरे झञ्झानिलेमरे। **झो** मूढे विषये गर्वे लेपे मूर्ध्नि खरे ध्वनौ॥३७॥

ञः प्राज्ञे त्रिषु ना चन्द्रसूनौ वर्त्मनि वेधसि। **टः** पुमान् करटे धूमे तापेर्ककिरणे ध्वनौ॥३८॥

कवाटवार्तयोः सूनौ भव्यावृत्त्योस्तु **टा** स्त्रियाम्। **ठः** शंकरे बृहद्धानौ **ठं** क्लीबं चन्द्रमण्डले॥३९॥

स्तम्भने साहसे चार्धत्रिषु शून्ये शठे दृढे। **डः** पुमान् विषये शम्भौ हासे त्रासे क्षये ध्वनौ॥४०॥

शङ्खध्वनौ रौद्ररसे व्रीडावाचोस्तु डा स्त्रियाम्। **डं** क्लीबे डमरे दुर्गे पथे डमरुकेपि च॥४१॥

आन्दोलने च त्रिषु तु **ड**शब्दो गायने जडे। **ढः** पिशाचे भये काले रोगेप्यङ्घे भये ध्वनौ॥४२॥

ढक्कायां तु स्त्रियां क्लीबे ज्ञाने तुर्यमुखेपि च। **ण**शब्दस्तु पुमान् जारे वैभवे कङ्कणे ध्वनौ॥४३॥

त्रिष्वयं निर्गुणे गूढे सौम्ये सव्यापसव्ययोः। **णा** स्त्रियां रजनीयशय्याधेनुनासाकृपासु च॥४४॥

णं सरोजदले ज्ञाने त्रिषु निस्तुषवस्तनु। **त**शब्दः पुंसि संयोगे निश्चये कोपपृच्छयोः॥४५॥

धातुवादविधौ चोरे करुणायां णा स्त्रियाम्। **तच्छब्दः** प्रकृतार्थोक्तौ त्रिषु हेतौ तदव्ययम्॥४६॥

तच्छब्दः क्रीडने स्त्री स्यात् क्रीडके त्वभिधेयवत्। क्षुत्पिपासेहयोः स्त्री स्यात् **थं** पुंस्यूर्मिगिरीन्दुषु॥

स्त्रीलिङ्गोयं तरङ्गिण्यां क्लीबे भयनिवारणे। वाच्यलिङ्गस्तु धवले श्यामले मधुरेपि च॥४८॥

दः पुंसि दातरि च्छेदे **दा** स्त्रियां क्षान्तिदानयोः। **दं** क्लीबेपानवैराग्यकलत्रेष्ववलोकने॥४९॥

भेद्यलिङ्गस्त्वयं मूके गृहीते द्रावके शुचौ। दर्शनज्ञाननेत्रेषु **दृक्** स्त्रियां द्रष्टरि त्रिषु॥५०॥

धः पुंस्यन्धे ध्वनौ ध्याने श्रीदे धन्वन्तरे घटे। **धं** वेश्मि धने बुद्धौ स्त्री वाचि धवले त्रिषु॥५१॥

धूर्ना धूपे स्त्री तु कम्पि वित्ते भारे युगाग्रयोः। हेरम्बे **नः** पुमान्नास्त्री नाभौ **न** ज्ञानवेद्ययोः॥५२॥

बध्यमानपरिक्लिष्टे शून्यभिन्नेषु **न**स्त्रिषु। **नु**शब्दस्तु स्तुतौ स्त्री स्या**न्नौः** स्त्रीतरणिकालयोः॥५३॥

पः पुमान्पवने शम्भौ प्रकाशे कौस्तुभे क्षणे। शुभलग्नेप्यथ क्लीबे हेम्नि पापापपानयोः॥५४॥

स्त्रीलिङ्गे त्वम्बुधारायां सुधायां संमतौ च पा। **पं** त्रिष्वार्ते प्रपन्ने च पुंस्त्रीपुरशरीरयोः॥५५॥

पुराणे चाथ **पुं**शब्दः पुरुषे परमात्मनि। **फो** झञ्झावात आस्फोटे फूत्कारे वारणे रणे॥५६॥

फा स्त्रिया निष्ठुरोक्तौ च कलौके काकुटीषु च। अधःस्फारे परोक्षे च **फशब्दो** वाच्यलिङ्गकः॥५७॥

बः कुम्भे वारणे बिन्दौ विकलोखे गुरौ मदे। विभूतिकारे कलहे पक्षिगर्भे च पर्वणि॥५८॥

बा स्त्रियां कदलीवल्लीशृङ्खलास्वलमे त्रिषु। **भः** शम्भौ भ्रमरे भावे शुक्रेशौ जलजे पुमान्॥५९॥

भा भुव्यलंकृतौ दीप्तौ स्त्रियां **भाः** किरणे सुते। क्लीबे तु गगने राशौ तारायां पुण्ड्रचक्रयोः॥६०॥

भीः स्त्री भीत्यां खगे पुंसि स्थानभूम्योस्तु **भूः** स्त्रियाम्। **मः** शम्भौ धातरीन्द्रे च चन्द्रे मासि च **माः** पुमान्॥

मा स्त्री माने मृतौ वेलामेधाश्रीमद्यमातृषु। **मा**व्ययं प्रतिषेधे च मज्जने तु नपुंसकम्॥६२॥

मुः पुंसि बन्धनेपि पिङ्गकपिलाभिधवर्णयोः। **य**स्त्यागे निलये वायौ यमे धातरि पातरि॥६३॥

या स्त्रियां यानमञ्जर्योः शोभालक्ष्म्योस्तु निर्गतौ। **यच्छब्दः** सर्वनामाख्यः त्रिषु हेतौ यदव्ययम्॥

या स्त्री ख्यातौ प्रकथने ज्यामौ वा मातृभूमिषु। **यु**र्नाकेप्यह्नि वह्नौ च स्वर्व्योम्नोर्द्यौर्दिवौ स्त्रियाम्॥

रः पुमान्पावके रामे क्षये वज्रे सरे प्लुतौ। **रा** स्त्रियां हेम्नि शालायामाशंसायां गतावपि॥६६॥

रं क्लीबे रुधिरे मूर्ध्नि ध्यानव्योमाण्डकुक्षिषु। वक्रे भये च त्रिषु तु विरसे दानतीक्ष्णयोः॥६७॥

रास्तु द्वयोर्धने स्वर्णे **रिशब्द**स्तु स्वरे क्षये। स्त्रीरुग्जालेच्छयोः कान्तौ **रु**र्णा युद्धे भये ध्वनौ॥६८॥

स्त्री कामिनीवम्रिकयोः दुःस्वर्णे[1] कामरूपिणि। श्रीर्वेषरचनाशोभासंपत्सरलशाखिषु॥६९॥

वाणीलक्ष्मीलवङ्गेषु विषे बिल्वेप्यथ त्रिषु। जरायां प्राषूरणे स्त्री स्यात् व्योमाङ्गे गतौ स्त्रियाम्॥७०॥

लः खण्डने त्रिष्वादाने स्त्री नेन्द्रलवणे तुलम्। **वः** पुमान् सान्त्वने वायौ संयमे वरुणे स्मरे॥७१॥

---

1 किं स्यादिति न ज्ञायते।

विः चक्षुषि व्योम्नि वाते परमात्मनि पक्षिणि। वेश्याजने पुरीषे विटक्रमात्पुंसि द्वयोः स्त्रियाम्॥७२॥

स्वो स्त्रीधने पुमान् ज्ञातौ त्रिष्वात्मीये स्वमात्मनि। **स्वर**व्ययं च त्रिदिवे त्विट्कान्तिज्वालयोः स्त्रियाम्॥७३॥

वल्के लवङ्गवल्वे त्विट्दर्दुरापाययोः स्त्रियाम्। **शौ** वल्के केशवे कूर्मे भूपे शिष्ये तनूकृतौ॥७४॥

शा स्त्रियां देवपूजायां शक्तौ शोभावरेण्ययोः। रमायां चाथ **शं** क्लीबे शास्त्रे श्रेयसि मङ्गले॥७५॥

कीर्तौ शस्त्रायुधे स्वर्गे **शः** परोक्षे त्रिलङ्गकः। **शम**व्ययं च सौख्यार्थे **शिः** शम्भौ शिवशान्तयोः॥७६॥

शीर्बाणहिंसास्वपिषु **षः** स्वर्गे विषमे च ना। **षा** स्त्री रमायां **षं** क्लीबे गर्वे मोक्षावसानयोः॥७७॥

मर्षणे च त्रिलिङ्गस्तु परोक्षश्रेष्ठयोरयम्। **सः** पुंस्युमासुते वायौ देहकान्तौ तु सा स्त्रियाम्॥७८॥

सं क्लीबे स्यन्दनपथे ज्ञाने ध्याने निवारणे। **सं** सन्सविदुषि श्रेष्ठे साधौ भगवति त्रिषु॥७९॥

सं क्लीबमक्षे सूशब्दः प्ररणे गर्भमोचने। **से**शब्दः स्तवने स्त्री स्यात् सेवकत्वेभिधेयवत्॥८०॥

हः शंकरे हरौ हंसे रणरोमाञ्चवाजिषु। गर्वे प्रचेतसि स्त्री तु **हा** त्यागे गतिवीणयोः॥८१॥

हं क्लीबमस्त्रसुखयोः क्वणिते मणिरोचिषि। परब्रह्मामन्त्रणयोः त्रिषु सन् भून्मत्तहासयोः॥८२॥

क्षः संरोधे विशेषे च क्षेमदुःस्वप्नयोश्च ना। **क्षा** स्त्री तु क्षमायां निद्रायां क्षं क्लीबे क्षत्ररक्षसोः॥८३॥

अप्राचुर्यप्रयोगस्य लिङ्गं क्वचिदुपेक्षितम्। एकाक्षरेषु शब्देषु तदूह्यं लक्ष्यवेदिभिः॥

इति जगदुपकारिणा भास्करकविबुधेन संगृहीतायाम् एकाक्षरकाण्डोयं पूर्णो नानार्थरत्नमालायाम्।

पुरोहितबालेन लिखितं तस्यैवेदं पुस्तकम्।

वर्णशिक्षा

वर्णानां स्त्रीपुंनपुंसकसंज्ञा

ककारं च गकारं च चकारं च जकारकम्
टकारं च डकारं च तकारं च दकारकम् १
पकारं च बकारं च षकारं च क्षकारकम्
एते द्वादशवर्णा स्युः पुंल्लिगाश्चेति कीर्तिताः २
खकारं च घकारं च छकारं च झकारकम्
ठकारं च ढकारं च थकारं च धकारकम् ३
फकारं च भकारं च शकारं च सकारकम्
एते वै भानुबीजानि जायाश्चेति प्रकीर्तिताः ४
शेषं नपुंसकं ज्ञेयं त्रयो भेदा इति स्मृताः
शिवाग्निभूतरुद्राश्च त्रयोदश तिथिस्तथा ५
एते वै स्वरवर्णा स्युः पुंल्लिङ्गाश्चेति कीर्तिताः
पक्षो वेदरसा भानुर्मनुशैवाधिकारकाः ६
एतानि स्वरवर्णानि स्त्रीलिङ्गानीति कीर्त्यते
प्रकृतिः सप्तवर्णानि विकृतिस्तु नवार्णकम् ७
प्रकृतिर्ह्रस्वमित्युक्तं विकृतिर्दीर्घमुच्यते
प्रथमाश्च तृतीयाश्च षकारश्च क्षकारकम् ८
एते द्वादशवर्णा स्युः पुंल्लिङ्गाश्चेति कीर्तिताः
द्वितीयाश्च चतुर्थाश्च शसकारौ तथैव च ९
एते द्वादशवर्णा स्युस्त्रील्लिङ्गाश्चेति प्रकीर्तिताः

वर्णानां सत्वरजस्तमो गुणाः

अन्तस्थाश्चोत्तमाश्चैव ऋ लृ वर्णौ तथैव च १०
हकारश्च ळकारश्च क्लीबाश्चेति प्रकीर्तिताः
पक्षो गृहार्थसंख्या च त्रयोदशमनुस्तथा ११

एते वै सात्विकगुणाः श्वेतवर्णं तथैव च
शिवाब्धिसप्तावसुदिक्च रुद्राः तिथिश्चैव कलास्तथा
१२
एते वै राजसगुणा रक्तवर्णं तथैव च
बाणो रसस्तृतीया च श्यामवर्णं तमो गुणः १३
हल्
द्वितीया च चतुर्थश्च तवर्गप्रथमोत्तमौ
पवर्गप्रथमश्चैव वेदाष्टादश एव च १४
एते वै सात्विकगुणा श्वेतवर्णं तथैव च
खकारं च घकारं च ठकारं च थकारकम् १५
तकारं च नकारं च पकारं च फकारकम्
वकारं च हकारश्च क्षकारं चेति सात्विकः १६
कवर्गप्रथमश्चैव टवर्गश्च तथैव च
तृतीयाश्च तपवर्गचतुर्थाश्च चटवर्गोत्तमौ तथा १७
ऊष्माणश्चैव रेफश्च लळकारौ रजोगुणाः
कवर्गप्रथमश्चैव टवर्गश्च तथैव च १८
तृतीयाश्च भकारश्च धकारं च ञकारकम्
णकारं चोष्मणश्चैव रेफश्चैव लळौ तथा १९
एते रजोगुणाः प्रोक्ता रक्तवर्णं तथैव च
चकारश्च द्वितीया च ङकारं च मकारकम् २०
ढकारं च दकारं च यकारं च झकारकम्
तामसः कृष्णवर्णं च उत्तमश्च मिश्रकम् २१
चकारश्च द्वितीया च आद्यन्तौ वर्गपञ्चमौ
चटवर्गचतुर्थौ च तवर्गश्च तृतीयकम् २२

यकारसामसगुणश्यामवर्णस्तथैव च २३
अकारं सर्वदैवत्यं रक्तवर्णं रजस्मृतम्
आकारस्यात्पराशक्ति श्वेतं सात्विकमुच्यते २४
इकारं विष्णुदैवत्यं श्यामं तामसमुच्यते
मायाशक्तिरितीकारं पीतं राजसमुच्यते २५
उकारं वास्तुदैवत्यं कृष्णं तामसमीरितम्
ऊकारं भूमिदैवत्यं श्यामळं तामसं भवेत् २६
ऋकारं ब्रह्मणो ज्ञेयं पीतं राजसमुच्यते
शिखण्डिरूपं ॠकारं राजसं पीतवर्णकम् २७
अश्विनौ तु ऌ ॡ प्रोक्तौ
एकारं वीरभद्रं स्यात् रजः पीतं तु सिद्धिदम् २८
ऐकारं वाग्भवं विन्द्या
ओकारमीश्वरं विंद्याज्ज्योतिः सत्वं फलप्रदम् २९
औकारमादिशक्ति स्याच्छुक्लं सर्वत्र सिद्धिदम्
अंकारं तु महेशं स्याद्रक्तवर्णं तु राजसम् ३०
अः कारं कालरुद्रं च रक्तं राजसमुच्यते
प्राजापत्यं ककारं स्यात्पीतं वृष्टिप्रदं रजः ३१
खकारं जाह्नवीबीजं क्षीराभं पापनाशनम्
गणापत्यं गकारं स्याद्रक्ताभं विघ्ननाशनम् ३२
घकारं भैरवं ज्ञेयं मुक्ताभं शत्रुनाशनम्
ङकारं कालबीजं स्यात्कालं तार्क्ष्यं समुच्यते ३३
चकारं चण्डरुद्रं स्यात् अञ्जनाभं तु तामसम्
छकारं भद्रकाळी स्यात्तामसं परिकीर्तितम् ३४
जकारं जम्भहा ज्ञेयं रक्ताभं च जयावहम्

झकारमर्धनारीशं श्यामरक्तं तु मिश्रकम् ३५
ञकारं सर्पदैवत्यं पीतं राजसरूपकम्
भृङ्गीशं स्याट्टकारं तु रक्तं राजसमेव च ३६
ठकारं चन्द्रबीजं स्याच्छ्वेतं सात्विकमुच्यते
डकारं चैकनेत्रं स्यात्पीतं राजसमुच्यते ३७
ढकारं यमबीजं स्यान्नीलं मृत्युविनाशनम्
णकारं नन्दिबीजं स्याद्रक्ताभं चार्थसिद्धिदम् ३८
तकारं वास्तुदैवत्यं श्वेतं
थकारं ब्रह्मणो ज्ञेयं
दुर्गाबीजं दकारं स्याच्छ्यामं सर्वार्थसिद्धिदम् ३९
धकारं धनदं प्रोक्तं पीताभं चार्थसिद्धिदम्
नकारं चैव सावित्री स्फाटिकं पापनाशनम् ४०
पकारं चैव पर्जन्यं शुक्लाभं वृष्टिसिद्धिदम्
फकारं पाशुपत्यं च सत्वः पापविनाशनम् ४१
बकारं तु त्रिमूर्ति स्यात्पीतं सर्वार्थसिद्धिदम्
भकारं भार्गवं विन्द्याद्रक्तं भाग्यप्रदं भवेत् ४२
मकारं मदनं विन्द्याच्छ्यामं कामफलप्रदम्
यकारं वायुदैवत्यं कृष्णमुच्चाटनं भवेत् ४३
रकारं वह्निदैवत्यं रक्ताभं राजसं भवेत्
लकारं पृथिवीबीजं पीतं स्यात् लम्भनं भवेत् ४४
वकारं वारुणं बीजं शुक्लाभं योगनाशनम्
लक्ष्मीबीजं शकारं स्यात् हेमाभं राजसं भवेत् ४५
षकारं द्वादशात्मं स्यात् रक्ताभं तु जयप्रदम्
सकारं शक्तिबीजं स्याद्रक्तं स्थितिकरं भवेत् ४६

हकारं शिवबीजं स्याच्छुद्धस्फटिकसन्निभम्
अणिमाद्यष्टसिद्धं च भुक्तिं मुक्तिं प्रयच्छति ४७
ळकारं चात्मबीजं स्यात् रक्ताभं सर्वसिद्धिदम् ४८
[इति वर्णशिक्षा समाप्ता]

Reference:
Descriptive Catalogue of Sanskrit Manuscripts in the Oriental Research Institute, University of Mysore. Mysore: Oriental Research Institute, Vol. II: (Vedāṅgam, etc.). 1978. Catalogued as Varṇa-Liṅgādi-Nirṇaya, Manuscript Catalog entry #3756 (Palm Leaf Bundle #4772, Text #20 in that bundle). Palm Leaves, Telugu script, 4 folios, incomplete.

[११] वररुचिविद्वत्कृता एकाक्षरनाममाला ।

गं[1] गामुमामुमौ मोमं[2] सन्नम्य व्याहराम्यहम् ।
काव्यकौशलसिद्ध्यर्थमेकाक्षरनिघण्टुकम् ॥ १ ॥
अकारो वासुदेवः स्यादाकारस्तु पितामहः ।
इकार उच्यते कामो लक्ष्मीरीकारे[3] उच्यते ॥ २ ॥
उकारः शङ्करे प्रोक्त ऊकारस्त्विह रक्षणे[4] ।
ऋकारो देवमाता स्याद् ॠ[5] धाता तु प्रकीर्त्तितः ॥ ३ ॥
ऌकारो देवयोनीनां ॡ धाता तु प्रकीर्त्तितः ।
एकार उच्यते विष्णुरैकारः स्यान्महेश्वरः ॥ ४ ॥
ओकार उच्यते ब्रह्मा औकारोऽनन्त उच्यते[6] ।
अं भवेत् परमं ब्रह्म अः[7] स्याच्चैव महेश्वरः ॥ ५ ॥
कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दितः ।
क आत्मा च समाख्यातः प्रकाशे क उदाहृतः ॥ ६ ॥
सखा[8] कश्च बुधैरुक्तो मुखे[9] सूर्येऽपि कः स्मृतः ।
कं शिरो जलमाख्यातं कं सुखे परिकीर्त्तितम् ॥ ७ ॥
पृथिव्यां कुः समाख्यातः कुशब्दः कुत्सितेऽपि च ।
खमिन्द्रियं समाख्यातं खमाकाशमुदाहृतम् ॥ ८ ॥
स्वर्गेऽपि च खं संप्रोक्तं शून्ये खड्गेऽपि खं स्मृतम् ।
खगोऽपि खः समाख्यातः स्वर्गेऽपि ख उदाहृतः ॥ ९ ॥
सूर्येऽपि खः समाख्यातः शून्यार्द्धे खमपि स्मृतम् ।
बिन्दौ सुखे श्रोतसि खं कथितं पूर्वसूरिभिः ॥ १० ॥

---

१ गं गणेशम्, गां भारतीम्, उमां पार्वतीम्, उमौ ब्रह्म-रुद्रौ, मां लक्ष्मीम्, अं विष्णुम् । २ ग. मामे । ३ ख. ०रमेव च । ४ ख. लक्षणे । ग. लक्ष्मणे । ५ ग. ऋकारो दनुजप्रसूः । ६ ख. एव च । ७ क. ग. अः इति स्याम्महेश्वरः । ८ ख. शिखी । ९ ख. मूर्खे ।

गो गणपतिरुद्दिष्टो गो गन्धर्वे प्रकीर्तितः ।
गं[1] च गीतं गश्च गाता गौर्धेनुर्गौः सरस्वती ॥ ११ ॥
गौर्वाणी[2] च समाख्याता गावो बाणाः प्रकीर्त्तिता ।
दिशि भू-रश्मि-वज्रेषु गौरक्षिण स्वर्ग-चारिणि ॥ १२ ॥
घो घण्टायां समाख्यातः किङ्किणी[3] घा प्रकीर्त्तिता ।
हनने घर्घरे[4] घोषेऽन्तर्घाते घो घटेऽपि च ॥ १३ ॥
ङकारो[5] भैरवे प्रोक्तो ङकारो विषये स्मृतः ।
चश्चन्द्रमाः समाख्यातस्तरवश्चा उदाहृताः ॥ १४ ॥
चुश्च[6]कोरे चकारोऽपि पक्षान्तरे समुच्चये ।
निर्मलं छं समाख्यातं तडि[7]च्छः सम्प्रकीर्त्तितः ॥ १५ ॥
छेदने छः समाख्यातः सूक्ष्मेऽपि छ उदाहृतः ।
छन्दःसु[8] छं समाख्यातं छश्च संवरणेऽपि च ॥ १६ ॥
वेगिते[9] जः समाख्यातो जनने जः प्रकीर्त्तितः ।
[10]जस्तेजसि समाख्यातो जेता जश्च प्रकीर्त्तितः ॥ १७ ॥
चारुचारो झकारः स्यान्नक्तं झः समुदाहृतः ।
झञ्झावायुर्झकारः स्याज्झषो झः समुदाहृतः ॥ १८ ॥
ञकारो गूढरूपेषु ञकारो व्यूहिते[11]ऽपि च ।
ञकारो गायने प्रोक्तो ञकारो घर्घरे ध्वनौ ॥ १९ ॥
टः पृथिव्यां चकोरेऽब्दे टं टो वायौ प्रकीर्त्तितः ।
ठो महेशः समाख्यातः ठश्च शून्ये प्रकीर्त्तितः ॥ २० ॥

---

१ ख. गतगीतश्च गा माता गौर्धेनुर्गौः सरस्वती । ग. गं गीतं गो भवेद् गाथा गौश्च धेनुः सरस्वती । २ ग. गौर्वाणी गो भवेन्माता । ३ क. ख. किङ्किणीषु प्रकीर्त्तितः । ४ क. घुर्घुरे । ५ ग. ङकारश्चौरे विख्यातो । ६ ग. चुश्चौरेऽपि । ७ ग. तरणिश्छः प्रकीर्तितः । ८ क. ख. छन्दश्च । ९ क. ख. विगते । १० क. ख. तेजस्तु जिः समाख्यातः सूरिभिः शब्दशासने । ११ ग. गूहितेऽपि ।

बन्दिवृन्दे च डः प्रोक्तो डकारश्चन्द्रमण्डले ।
डकारः शङ्करे त्रासे डकारो ध्वनिरुच्यते ॥ २१ ॥
ढकारः कीर्त्तिता ढक्का निर्गुणे च ध्वनावपि ।
णकारः कीर्त्तितो ज्ञाने निर्गुणे णः प्रकीर्त्तितः ॥ २२ ॥
णकारः प्रकटे बन्धे णुः स्तुतौ च प्रकीर्त्तितः ।
तकारः कथितश्चौरे [1]क्रोडे युद्धे च कीर्त्तितः ॥ २३ ॥
तुः स्यात् [2]पूर्वनिवृत्तौ च पूर्वस्माच्च विलक्षणे ।
अवधारणे तुकारो विकल्पार्थे तथोदितः ॥ २४ ॥
शिलोच्चये थकारः स्यात् थकारो भार उच्यते ।
[3]दं कलत्रं बुधैः प्रोक्तं दो दानेऽपि च दातरि ॥ २५ ॥
धं धने धनदे धीरे धी धीरिषुधिरुच्यते ।
[4]धूर्धुरा कम्पने धूर्ते धश्चाऽश्ववार-चित्रयोः ॥ २६ ॥
रथाङ्गे धूः समाख्याता चिन्तायां धूः प्रकीर्त्तिता ।
नकारः कीर्त्तितो ज्ञाने नुः स्तुतौ च प्रकीर्त्तितः ॥ २७ ॥
नेता नीर्ना मनुष्ये च तरण्यां नौ प्रकीर्त्तिता ।
नो निषेधे नकारेऽपि निःश्रुतेऽपि प्रकीर्त्तितः ॥ २८ ॥
नौ निषेधे नकारेऽपि नौ तथाप्यावयोस्तु नौ ।
अस्मानऽस्माकमस्मभ्यमित्यस्मिन् नः प्रकीर्त्तितः ॥ २९ ॥
[5]पकारः पवने प्रोक्तः पा स्तुतौ पा च पातरि ।
पकारो वर्णके प्रौढे पकारः प्रकटे पथि ॥ ३० ॥
फम्फावाते फकारः स्यात् तथा [6]निष्फलभाषणे ।
पुष्करेऽपि फकारः स्यात् फकारो भयरक्षणे ॥ ३१ ॥

---

१ ग. क्रोडे पक्षे च युद्धके । २ ख. सर्वनिवृत्तौ । ३ ख. बुद्धिदा च । ४ ग. धूमे । ५ ग. पकारः पवमाने स्यात् पावने नैव (चैत्र) पातरि । ६ ग. स्थाने च कीर्त्तितः । फूत्कारेऽपि च फः प्रोक्तस्तथा निष्फलभाषणे ।

प्रचेता **बः** समाख्यातः कलहे **ब** उदाहृतः ।
पक्षी च **बि**र्निगदितो गगनं **बि**स्तथोदितम् ॥ ३२ ॥
नक्षत्रं **भं** बुधाः प्राहुर्भ्रमरे **भः** प्रकीर्त्तितः ।
दीप्तिर्**भा** [1]**भू**र्भवेद् भूमिर्**भी**र्भयं कथितं बुधैः ॥ ३३ ॥
मः शिवश्चन्द्रमा वेधा **मा** च लक्ष्मीः प्रकीर्त्तिता ।
मा तु मातरि माने च बन्धने **मुः** प्रकीर्त्तितः ॥ ३४ ॥
मे ममार्थे निषेधे **मा** मामित्यत्र प्रकीर्त्तितः ।
[2]येमो **यः** कथितः शिष्टै[3]र्**यो** धातरि च सम्मतः ॥ ३५ ॥
या नियन्तरि **या** लक्ष्मीः कथिता शब्दकोविदैः ।
रश्च रामेऽनले [4]वज्रे शब्दे **रश्च** प्रकीर्त्तितः ॥ ३६ ॥
धने **रा** आश्रये ख्यातो **रु**र्भये रक्षणेऽपि च ।
[5]ईन्द्रेऽपि लवने चैव [6]**लू**र्**ला**ऽऽदाने प्रकीर्त्तितः ॥ ३७ ॥
दिशश्चापि **लव**श्चैव **ल**कारश्चामृते स्मृतः ।
ले श्लेषणे समाख्यातः शब्दशासनकोविदैः ॥ ३८ ॥
सान्त्वने वरुणे वाते **व**कारः सम्प्रकीर्त्तितः ।
वा वितर्के विकल्पे च युष्माकं **वः** प्रकीर्त्तितः ॥ ३९ ॥
युष्मभ्यं च तथा युष्मान् **वां** युवयोश्च कीर्त्तितः ।
[7]पक्षिणि गगने चैव **वि**श्च प्रोक्तो मनीषिभिः ॥ ४० ॥
ब्रुवन्ति **शं** बुधाः श्रेयः शान्ते **शा** च निगद्यते ।
शीश्चापि शयने प्रोक्ता हिंसायां **शु**र्निगद्यते ॥ ४१ ॥
षकारः कीर्त्तितः [8]श्लेष्मा **षू** च गर्भविमोचने ।
सदारः **षः** समाख्यातः **सा** च लक्ष्मीः प्रकीर्त्तिता ॥ ४२ ॥

---

१ क. ख. भश्च भूर्भूमिर्भीर्भयं । २ ग. यशो । ३ ग. °ष्टैर्यो धाता च वायुरित्यपि । ४ ग. वह्नौ शठे रुश्च प्रकीर्त्तितः । ५ ग. लं याने लवने लूः स्याल्लो दाने च प्रकीर्त्तितः । ६ ख. लूर्लविच्छेदयोः स्मृतौ । ७ ख. विहङ्गे । ८ ख. श्रेष्ठे ।

सः परोक्षे च कामे च सः कोपे वारुणे स्मृतः ।
सः सूर्येऽपि समाख्यातः सं सम्यक् परिकीर्त्तितम् ॥ ४३ ॥

हः कोपवाची रणे हस्तथा शूले निगद्यते ।
हिः स्याद्धेतौ वि[1]तरणे तथा हिरवधारणे ॥ ४४ ॥

हे तु सम्बोधने प्रोक्तो है हा चेति [तु] कष्टयोः ।
हुं प्रश्ने चाथ होमे च हं परब्रह्मलक्षणम् ॥ ४५ ॥

हो निपाते च बोधे ह्रो हस्ते दारुणि शूलिनि ।
क्षः क्षेत्रे राक्षसे चापि क्षिः क्षये सम्प्रकीर्त्तितः ॥ ४६ ॥

इति वाररुचं प्रोक्तं यो वेत्त्येनं निघण्टुकम् ।
वा[2]गर्णवे यथाकामं तस्य स्वा[3]न्तं प्रवर्त्तते ॥ ४७ ॥

इति वररुचिविद्वत्कृता एकाक्षरनाममाला समाप्ता [११] ॥

---

१ ख. च दृष्टान्ते । ग. विवरणे । २ ख. गणयेच्च यथा कामं ख्यातिस्तस्य प्रवर्द्धते । ३ ग. स्वातन्त्र्यं वर्त्तते ।

वर्णमातृका

- अग्नि ५९.१६(म, भ आदि की जीव, प्राण आदि संज्ञाएं), ८५.३, ८६.३, ८७.२, ८८.३(निवृत्ति आदि कलाओं में वर्णों का विभाजन), ९२.२३(वर्णमातृका से विभिन्न दिशाओं में शल्य का ज्ञान), १२५.१६(४५ वर्णों का बाल, कुमार, युवा, वृद्ध व मृत्यु वर्गों में विभाजन, नन्दिकेश्वर सूत्रों से साम्य), १२३.१(वर्णमाला के अक्षरों के ग्रह स्वामियों का विचार), १४५(वर्णमातृका न्यास का वर्णन), २९३.३७ (वर्ण मातृका न्यास की विधि), २९३.४१(वर्णमातृका में स्वरों व व्यञ्जनों के देवता), ३१७.३(वर्णमातृका के अक्षरों के देवताओं का कथन), ३३६(वर्णमातृका का निरूपण), ३४८(एकाक्षर कोश),
- कालिका ५६.४५(क, च, ट, त, प की मातृकाएं तथा उनके द्वारा रक्षाओं का कथन),
- गरुड १.११ (बीज मन्त्र का न्यास),
- नारद १.६६.८६(वैष्णव, शैव व गाणपत्य वर्णमातृका नाम व न्यास), २.१२१.९६,
- ब्रह्माण्ड ३.४.३७(वर्ण मातृका), ४.४४.२२(वर्ण मातृका), ३.४.४४.७१,
- लिङ्ग १.१७.७३(वर्णमाला का शिव की देह में न्यास),
- वायु १०४.७१/२.४२.७१(व्यास द्वारा वर्णों का देह का अङ्गों में दर्शन),
- विष्णुधर्मोत्तर १.८८(ग्रह - नक्षत्रों के मण्डलों में वर्ण),
- शिव २.१.८.३२(शिव की देह के वर्णमातृका स्वरूप का कथन), ७.२.३८.६६(देह के विभिन्न चक्रों में वर्णों का न्यास),
- स्कन्द १.२.५.५१(वर्णमाला में देवताओं का न्यास, वर्णमाला के विभिन्न अक्षरों का विभिन्न वर्गों में वर्गीकरण),
- लक्ष्मीनारायण २.१२१.९६(ब्रह्मा द्वारा मेष, वृष आदि राशियों को विभिन्न वर्ण प्रदान का कथन), २.१५६.९५ (अक्षर मातृका न्यास), २.१६०.८९(प्राण प्रतिष्ठा में न्यास के अन्तर्गत पञ्चभूत, तन्मात्रा, ज्ञानकृत, कर्मकृत आदि के लिए वर्णों का न्यास), ३.१५०.६५(हनुमान के संदर्भ में वर्णमातृका का न्यास),
- भरतनाट्य १४.९(वर्णों का घोष-अघोष, दन्त्य, तालव्य आदि में वर्गीकरण),

भूतचैतन्यता कस्य ज्ञानस्य सुप्रकाशता ३४
प्रज्ञातस्थूलताशब्दानेकान्तत्वं तथार्हतः
शैववैष्णवशाक्तेयसौरसिद्धान्तिनां मतिः ३५
जगतः कारणं ब्रह्म साङ्ख्यानां सप्रधानकम्
अस्मिन् सरस्वतीलोके सञ्चरन्तः परस्परम् ३६
बध्नन्ति व्यतिपश्यन्तो यद्विशिष्टः स उच्यते
परिग्रहादप्यसतां सतामेवापरिग्रहात् ३७
भिद्यमानस्य तस्यायं द्वैविध्यमुपगीयते
प्रत्यक्षादिप्रमाणैर्यद् बाधितं तदसद्विदुः ३८
कविभिस्तत् प्रतिग्राह्यं ज्ञानस्य द्योतमानता
यदेवार्थक्रियाकारि तदेव परमार्थसत् ३९
अज्ञानाज्ज्ञानतस्त्वेकं ब्रह्मैव परमार्थसत्
विष्णुः स्वर्गादिहेतुः स शब्दालङ्काररूपवान्
अपरा च परा विद्या तां ज्ञात्वा मुच्यते भवात् ४०
इत्याग्नेये महापुराणे अलङ्कारे काव्यदोषविवेको नाम षट्चत्वारिंशदधिकत्रिशततमोऽध्यायः

अथ सप्तचत्वारिंशदधिकत्रिशततमोऽध्यायः
एकाक्षराभिधानम्

अग्निरुवाच
एकाक्षराभिधानञ्च मातृकान्तं वदामि ते
अ विष्णुः प्रतिषेधः स्यादा पितामहवाक्ययोः १
सीमायामथाव्ययमा भवेत्संक्रोधपीडयोः
इः कामे रतिलक्ष्म्योरी उः शिवे रक्षकाद्य ऊः २
ऋ शब्दे चादितौ ॠ स्यात् लृ ॡ ते वै दितौ गुहे
ए देवी ऐ योगिनी स्यादो ब्रह्मा औ महेश्वरः ३

अङ्कामः अः प्रशस्तः स्यात् को ब्रह्मादौ कु कुत्सिते
खं शून्येन्द्रियं खड्गो गन्धर्वे च विनायके ४
गङ्गीते गो गायने स्याद् घो घण्टा किङ्किणीमुखे
ताडने ङश्च विषये स्पृहायाञ्चैव भैरवे ५
चो दुर्जने निर्मले छश्छेदे जिर्जयने तथा
जं गीते झः प्रशस्ते स्याद्बले ञो गायने च टः ६
ठश्चन्द्रमण्डले शून्ये शिवे चोद्बन्धने मतः
डश्च रुद्रे ध्वनौ त्रासे ढक्वायां ढो ध्वनौ मतः ७
णो निष्कर्षे निश्चये च तश्चौरे क्रोडपुच्छके
भक्षणे थश्छेदने दो धारणे शोभने मतः ८
धो धातरि च धूस्तूरे नो वृन्दे सुगते तथा
प उपवने विख्यातः फश्च झञ्झानिले मतः ९
फुः फुत्कारे निष्फले च विः पक्षी भञ्च तारके
मा श्रीर्मानञ्च माता स्याद्यागे यो यातृवीरणे १०
रो बह्नौ च लः शक्रे च लो विधातरि ईरितः
विश्लेषणे वो वरुणे शयने शश्च शं सुखे ११
षः श्रेष्ठे सः परोक्षे च सा लक्ष्मीः सं कचे मतः
धारणे हस्तथा रुद्रे क्षः क्षत्रे चाक्षरे मतः १२
क्षो नृसिंहे हरौ तद्वत् क्षेत्रपालकयोरपि
मन्त्र एकाक्षरो देवो भुक्तिमुक्तिप्रदायकः १३
हैहयशिरसे नमः सर्वविद्याप्रदो मनुः
अकाराद्यास्तथा मन्त्रा मातृकामन्त्र उत्तमः १४
एकपद्मेऽर्चयेदेतान्नव दुर्गाश्च पूजयेत्
भगवती कात्यायनी कौशिकी चाथ चण्डिका १५
प्रचण्डा सुरनायिका उग्रा पार्वती दुर्गया
ॐ चण्डिकायै विद्महे भगवत्यै धीमहि तन्नो दुर्गा प्रचोदयात्

क्रमादि तु षडङ्गं स्याद्गणो गुरुर्गुरुः क्रमात् १६
अजितापराजिता चाथ जया च विजया ततः
कात्यायनी भद्रकाली मङ्गला सिद्धिरेवती १७
सिद्धादिवटुकाः पूज्या हेतुकश्च कपालिकः
एकपादो भीमरूपो दिक्पालान्मध्यतो नव १८
ह्रीं दुर्गे दुर्गे रक्षणि स्वाहामन्त्रार्थसिद्धये
गौरी पूज्या च धर्माद्याः स्कन्दाद्याः शक्तयो यजेत् १९
प्रज्ञा ज्ञाना क्रिया वाचा वागीशी ज्वालिनी तथा
कामिनी काममाला च इन्द्राद्याः शक्तिपूजनम् २०
ॐ गं स्वाहा मूलमन्त्रोऽयं गं वा गणपतये नमः
षडङ्गो रक्तशुक्लश्च दन्ताक्षपरशूत्कटः २१
समोदकोऽथ गन्धादिगन्धोल्कायेति च क्रमात्
गजो महागणपतिर्महोल्कः पूज्य एव च २२
कुष्माण्डाय एकदन्तत्रिपुरान्तकाय श्यामदन्तविकटहरहासाय
लम्बनाशाननाय पद्मदंष्ट्राय मेघोल्काय धूमोल्काय
वक्रतुण्डाय विघ्नेश्वराय विकटोत्कटाय गजेन्द्रगमनाय
भुजगेन्द्रहाराय शशाङ्कधराय गणाधिपतये स्वाहा
एतैर्मनुभिः स्वाहान्तैः पूज्य तिलहोमादिनार्थभाक्
काद्यैर्वा वीजसंयुक्तैस्तैराद्यैश्च नमोऽन्तकैः २३
मन्त्राः पृथक् पृथग्वा स्युर्द्विरेफद्विर्मुखाक्षिणः
कात्यायनं स्कन्द आह यत्तद्व्याकरणं वदे २४

इत्याग्नेये महापुराणे एकाक्षराभिधानं नाम
सप्तचत्वारिंशदधिकत्रिशततमोऽध्यायः

अथाष्टचत्वारिंशदधिकत्रिशततमोऽध्यायः

व्याकरणम्

स्कन्द उवाच
वक्ष्ये व्याकरणं सारं सिद्धशब्दस्वरूपकम्
कात्यायनविबोधाय बालानां बोधनाय च १
प्रत्याहारादिकाः संज्ञाः शास्त्रसंव्यवहारगाः
अ इ उ ण ऋ लृ क ए ङ ऐ औ च ह य व र ट ण न ञ म ङ ण
नम झ भ ञ घ ध ष ज व ग ड द श ख फ छ ठ थ च ट त क प
य श ष स र ह ल इति प्रत्याहारः
उपदेश इद्धलन्तं भवेदजनुनासिकः २
आदिवर्णो गृह्यमाणोऽप्यन्त्येनेता सहैव तु
तयोर्मध्यगतानां स्याद्ग्राहकः स्वस्य तद्यथा ३
अण् एङ् अट् यङ् छव् भम् भष् अक् इक् अण् इण् यण् परेण
णकारेण । अम् यम् ङम् अच् इच् ऐच् अय् मय् भय् खय् जव् भव्
खव् चव् शव् अस् हस् वस् भस् अल् हल् बल् रल् भल् सल्
इति प्रत्याहारः

इत्याग्नेये महापुराणे व्याकरणे प्रत्याहारो
नामाष्टचत्वारिंशदधिकत्रिशततमोऽध्यायः

अथोनपञ्चाशदधिकत्रिशततमोऽध्यायः
सन्धिसिद्धरूपम्

स्कन्द उवाच
वक्ष्ये सन्धिसिद्धरूपं स्वरसन्धिमथादितः
दण्डाग्रं सागता दधीदं नदीहते मधूदकम् १
पितृषभः लृकारश्च तवेदं सकलोदकम्
अर्धर्चोऽयं तवल्कारः सैषा सैन्द्री तवौदनम् २
खट्वौघोऽभवदित्येवं व्यसुधीर्वस्वलङ्कृतम्
पित्रर्थोपवनं दात्री नायको लावको नयः ३